“ऋतुकालाभिगमनं धर्म्मोऽयं गृहिणः परः। स्त्रीणां वरमनुस्मृत्य यथाकाम्यथ वा भवेत्। दिवाभिगमनं पुंसामनायुष्यं परं मतम्। श्राद्धाहः सर्व्वपर्व्वाणि यत्नात् त्याज्यानि धीमता। तत्र गच्छन् स्त्रियं मोहात् धर्म्मात्प्रच्यवते परात्। ऋतुकालाभिगामी यः स्वदारनिरतश्च यः। स ब्रह्मचारी धर्मज्ञोविज्ञेयः स गृहाश्रमी। ऋतुःषोड़शयामिन्यश्चतस्रस्तासु गर्हिताः। पुत्रास्तास्वपि या युग्माः अयुग्माः कन्यकाप्रजाः। त्यक्त्वा चन्द्रमसं दुःस्थं मघां मूलां विहाय च। शुचिः संनिविशेत्पत्नीं पुंनामक्ष विशेषतः। शुचिं पुत्रं प्रसूयेत पुरुषार्थप्रसाधकम्। आर्षे विवाहे गोद्वन्द्वं यदुक्तं तन्न शस्यते। शुल्कमण्वपि कन्यायाः कन्याविक्रयपापकृत्। अपत्यविक्रयी कल्पं वसेद्विट्कृमिभोजने। अतोनाण्वपि कन्यायाः उपजीवेत्पिता धनम्। स्त्रीधनान्युपजीवन्ति ये मोहादिह बान्धवाः। न ते परं निरयगास्तेषामपि हि पूर्व्वजाः। पत्या तुष्यति यत्र स्त्री तुष्येद्यत्रस्त्रिया पतिः। तत्र तुष्टा महालक्ष्मीर्निवसेद्दानवारिणा”

“वाणिज्यं नृपतेः सेवा वेदानध्ययनं तथा। कुविवाहः क्रियालोपः कुले पतनहेतवः। कुर्य्याद्वैवाहिके वह्नौ गृह्यं कर्म्मान्वहं गृही। पञ्चयज्ञक्रियां वापि पक्तिं दैनन्दिनीमपि। गृहस्थाश्रमिणः पञ्चसूनाकर्म्म दिनेदिने। कण्डनी पेषणी चुल्ली उदकुम्भस्तु मार्ज्जनी। तासाञ्च पञ्चसूनानां निराकरणहेतवः। क्रतवः पञ्च निर्द्दिष्टा गृहिश्रेयोऽभिवर्द्धनाः। पठनं ब्रह्मयज्ञः स्यात्तर्पणञ्च पितृक्रतुः। होमोदैवो बलिर्भौतोऽतिथ्यर्च्चा क्रतवः क्रमात्। पितृप्रीतिं प्रकुर्व्वाणः कुर्वीत श्राद्धमन्वहम्। अन्नोदकपयोमूलफलैर्वापि गृहाश्रमी। गोदानेषु च यत्पुण्यं पात्राय विधिपूर्वकम्। सत्कृत्य भिक्षवे भिक्षां दत्त्वा तत्फलमाप्नुयात्। तपोविद्यासमिद्धेऽग्नौ हुतं विप्राख्यपावके। तारयेद्विघ्नसंघेभ्यः पापाब्धेरपि दुस्तरात्। अनर्च्चितोऽतिथिर्गेहात् भग्नाशो यस्य गच्छति। आजन्म सञ्चितात् पुण्यात् तत् क्षणात् स बहिर्भवेत्। सान्त्वपूर्व्वाणि वाक्यानि शय्यार्थं भूस्तृणोदकैः। एतान्यपि प्रदेयानि सदागन्तुकतुष्टये। गृहस्थः परपाकाढ्यः प्रेतः सन् पशुपतां व्रजेत्। श्रेयः परार्थपुष्टस्य गृह्णीयादन्नदोषतः। आदित्योढोऽतिथिः सायं सत्कर्त्तव्यः प्रयत्नतः। असत्कृतोऽन्यतोगच्छन् दुष्कृतं भूरि यच्छति। भुञ्जानोऽतिथिशेषान्नमिन्द्रायुर्धनभाग्भवेत्। प्रणोद्यातिथिमन्नाशी किल्विषी च गृहाश्रमी। वैश्वदेवान्तसंप्राप्तः सूर्य्योढोवाऽतिथिः स्मृतः। न पूर्व्वकाल आयातो न च दृष्टचरः क्वचित्। बलिपातकरे विप्रे यद्यन्योऽतिथिरागतः। अदत्त्वा तं बलिं तस्मै यथाशक्त्यन्नमर्पयेत्। कुमाराश्च सुवासिन्योगर्भिण्योऽतिरुजान्विताः। अतिथेरादितोऽप्येते भोज्या नात्र विचारणा। पितृदेवमनुष्येभ्योदत्त्वाचाद्यात्स्वतं गृही। स्वार्थं पचन्नघं भुङ्क्ते केवलं स्वोदरम्भरिः। माध्याह्निकं वैश्वदेवं गृहस्थः स्वयमाचरेत्। पत्नी सायं बलिं दद्यात् सिद्धान्नैर्मन्त्रवर्जितम्। एतत्सायन्तनं नाम वैश्वदेवं गृहाश्रमे। सायं प्रातर्भवेद्देवं वैश्वदेवं प्रयत्नतः। वैश्वदेवेन ये हीना आतिथ्येन विवर्ज्जिताः। सर्वे ते वृषलाज्ञेया प्राप्तवेदा अपि द्विजाः। अकृत्वा वैश्वदेवं तु भुञ्जते ये द्विजाधमाः। इह लोकेऽन्नहीनाः स्युः काकयोनिं व्रजन्त्यथ। वेदोदितं स्वकं कर्म्म नित्यं कुर्य्यादतन्द्रितः। तद्धि कुर्व्वन् यथाशक्ति प्राप्नुयात् स्वर्गतिं पराम्। षष्ठ्यष्टम्योर्वसेत्पापं तैले मांसे सदैव हि। पञ्चदश्यां चतुर्दश्यां तथैवच भगे क्षुरे। उद्यन्तं न चेक्षेत नास्तं यान्तं न मध्यगम्। न राहुणोपसृष्टं च नाम्बुसंस्थं दिवाकरम्। न वीक्षेतात्मनोरूपमप्सु धावेन्न वर्षति। नोल्लङ्घयेद्वत्सतन्त्रीं न नग्नोजलमाविशेत्। देवतायतनं विप्रं धेनुं मधु घृतं मृदम्। जातिवृद्धं वयोवृद्धं विद्यावृद्धं तपस्विनम्। अश्वत्थं चैत्यवृक्षं च गुरुं जलभृतं घटम्। सिद्धान्नं दधि सिद्धार्थं गच्छन् कुर्य्यात् प्रदक्षिणम्। रजस्वलां न सेवेत नाश्नीयात् सह भार्य्यया। एकवासा न भुञ्जीत न भुञ्जीतोत्कटासने। नाशुतीं स्त्रीं समीक्षेत तेजस्कामोद्विजोत्तमः। असंतर्प्य पितृन् देवान् नाद्यादन्नं नरः क्वचित्। पक्वान्नं चापिनो मांसं दीर्घकालं जिजीविषुः। न मूत्रं गोव्रजे कुर्य्यान्न वल्मीके न भस्मनि। न गर्त्तेषु ससत्वेषु न तिष्ठन्न व्रजन्नपि। गोविप्रसूर्य्यवाय्वग्नि चन्द्रार्काम्बुगुरूनपि। अभिपश्यन्न कुर्व्वीत मूत्रोच्चारविसर्ज्जनम्। तिरस्कृत्यावनीं लोष्ट्रकाष्ठपत्रतृणादिभिः। प्राद्वृत्य वाससा मौलिं मौनो विण्मूत्रमुत्सृजेत्। यथासुखमुखोरात्रौदिने छायान्धकारयोः। भीतिषु प्राणबाधायां कुर्य्यान्मलविसर्ज्जनम्। मुखेनोपधमेन्नाग्निन्नग्नां नेक्षेत योषितम्। नाङ्घ्री प्रतापयेदग्नौ न वस्तु शुचि निक्षिपेत्। प्राणिहिंसां न कुर्व्वीत नाश्नीयात्सन्ध्ययोर्द्वयोः। न संविशेच्च सन्ध्यायां प्रत्यक्सौम्यशिरा अपि। विण्मूत्रष्ठीवनं नाप्सु कुर्य्याद्दीर्घं जिजीविषुः। नाचक्षीत धयन्तीं गां नैन्द्रं चापं प्रदर्शयेत्। नैकः सुप्यात् क्वचित् शून्ये न शयानं प्रबोधयेत्। पन्थानं